Title मणुस्मृतिवृत्तिः मन्वर्थमुक्तावली

Author कुल्लूक भट्टः

Extent ६ Age

Subject धर्मशास्त्रम् . अपूर्णम्

नं० ६१६-घ

मनुस्मृतिः मन्वर्थमुक्तावलीव्याख्यासहिता (धर्मशास्त्रम्)

पत्राणि ८ (अपूर्णम्)

नं० ५१६-घ

कर्ता कुल्लूमभट्ट।

८ पत्राणि

सं० ३२६५ [illegible]

मनुस्मृतिसटीकप० १

॥६०॥ ॐ स्वस्ति श्रीगणपतये नमः॥ ॐ नमो भगवते वासुदेवाय॥ गौडे नंदनवासिनाम्नि सुजनैर्वन्द्ये वरेंद्र्यां कु
ले श्रीमद्भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभवत्। काश्यामुत्तरवाहिजह्नुतनयातीरे समं पंडितैस्तेनेयं क्रि
यते हिताय विदुषां मन्वर्थमुक्तावली॥१॥ सर्वज्ञस्य मनोरसर्वविदपि व्याख्यामि यद्वाङ्मयं युक्त्या तद्बहुम
र्य्यंतां मुनिवरैरेतद्बहु व्याहृतम्। तां व्याख्यामधुना तनेरपि कृतां न्याय्यां तु वाक्यस्य मे भक्त्या मानववाङ्म
ये भवभिद्भूयाद्दशेषेश्वरः॥२॥ मीमांसे बहु सेवितासि सुहृत्तर्काः समस्ताः स्थ मे वेदांताः परमात्मबो
धगुरवो यूयं मयोपासिताः। जाता व्याकरणानि बालसखिता युष्माभिरभ्यर्थये श्रान्तोऽयं समयो मनस्तु वि
हृतो साहाय्यमालंव्यताम्॥३॥ देवादिदोषरहितस्य सतां हिताय मन्वर्थतत्त्वकथनाय समुद्यतस्य॥
दैवाद्यदि क्वचिदिह स्खलनं तथापि निस्तारको भवतु मे जगदंतरात्मा॥४॥ मानवहृत्तावस्यां ज्ञेया व्याख्यान
वामयोद्भिन्नाः। प्राचीनाञ्चापि रुचिरा व्याख्यातॄणां मयैषाणाम्॥५॥ मनुमेकाग्रमासीनमित्यादि। अत्र
महर्षीणां धर्मविषयप्रश्ने मनोः श्रूयतामित्युत्तरदानपर्य्यंतश्लोकचतुष्टयेनैतस्य शास्त्रस्य प्रेक्षावत्प्र

इत्युपयुक्तानि विषयसंबंधप्रयोजनान्युक्तानि· तत्र धर्म एव विषयस्तेन सह वचनसंदर्भरूपस्य मानवशा-
स्त्रस्य प्रतिपाद्यप्रतिपादकलक्षणः संबंधः। प्रमाणांतरासन्निकृष्टस्य स्वर्गापवर्गादिसाधनस्य धर्मस्य शास्त्रै-
कगम्यत्वात्· प्रयोजनं तु स्वर्गापवर्गादि तस्य धर्माधीनत्वात्· यद्यपि पत्न्युपगमनादिरूपः कामोप्यत्राभिहितस्त-
थापि· ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदेति ऋतुकालादिनियमेन सोपि धर्म्म एव· एतच्चार्थार्जनमपि ऋ-
श्रीमहागणपाय नमः॥ मनुमेकाग्रमासीनमभिगम्य महर्षयः। प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन्॥१॥
तामृताभ्यां जीवेदित्यादिनियमेन धर्म्म एवेत्यवगंतव्यम्· मोक्षोपायत्वेनाभिहितस्यात्मज्ञानस्यापि धर्म्मत्वाद्वे-
मे विषयत्वमोक्षोपदेशकत्वं चास्य शास्त्रस्योपपन्नम्· पौरुषेयत्वेपि मनुवाक्यानामविगीतमहाजनपरि-
गृहीतत्वानुपगृहीतत्व· वेदमूलकतया प्रामाण्यं तथा च छांदोग्यब्राह्मणे श्रूयते· मनुर्वै यत्किंचिदवदत्तद्भे-
षजं भेषजताया इति· बृहस्पतिरप्याह· वेदार्थोपनिबंधृत्वात्प्राधान्यं हि मनोः स्मृतम्· मन्वर्थविपरीता
तु या स्मृतिः सा न शस्यते· तावच्छास्त्राणि शोभंते तर्कव्याकरणानि च· धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृ-

श्यति। महाभारतेऽप्युक्तं। पुराणं मानवो धर्मः सांगो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतु
२ भिः। विरोधिवेदादितर्कैर्न हंतव्यानि। अनुकूलस्तु मीमांसादितर्कः प्रवर्त्तनीय एव। अत एव वक्ष्यति। आर्षं
धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः॥ इति। सकलवेदार्थादिमनना
न्मनुर्महर्षेर्यदिदं द्वितीयश्लोकवाक्यरूपं उच्यते अनेनेति वचनमनुवदन्। श्लोकस्यादौ मनुनिर्देशो मंग
लार्थः। परमात्मन एव संसारस्थितये सार्वज्ञ्यैश्वर्यादिसंपन्नमनुरूपेण प्रादुर्भूतत्वात्। तदभिधानस्य
मंगलातिशयत्वात्। वक्ष्यति हि। एनमेके वदंत्यग्निं मनुमन्ये प्रजापतिमिति। एकाग्रं। विषयांतराव्याक्षिप्त
चित्तं। आसीनं सुखोपविष्टं। इदृशस्यैव महर्षिप्रश्नोत्तरदानयोर्योग्यत्वात्। अभिगम्य अभिमुखं गत्वा।
महर्षयो महांतः अत्र ऋषयश्चेति तथा प्रतिपूज्य पूजयित्वा। यद्वा। मनुना पूर्वं स्वागतासनदानादिना पूजिता
स्तस्य पूजां कृत्वेति प्रतिशब्दादुन्नीयते। यथा न्यायं येन न्यायेन विधानेन प्रष्टुः कर्त्तुं युज्यते। प्रणतिभ २
क्तिश्रद्धातिशयादिना। वक्ष्यति। नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छत इति। अभिगम्य। प्रतिपूज्य अ

ब्रुवन्निति· क्रियात्रयेपि मनुमित्येव कर्म अब्रुवन्नित्यत्राकथितकर्मता· ब्रुविधातोर्द्विकर्मकत्वात्·॥१॥ किमब्रु
वन्नित्यपेक्षायामाह। भगवन्नित्यादि· ऐश्वर्यादीनां भगशब्दो वाचकः। तदुक्तं विष्णुपुराणे· ऐश्वर्यस्य समग्रस्य
वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा। तद्युक्तेन संबोधनं भगवन्निति· वर्णा ब्राह्मणक्षत्रि
यवैश्यशूद्राः सर्वे च ते वर्णाश्चेति सर्ववर्णाः। तेषामंतरप्रभवाणां च संकीर्णजातीनां चापि अनुलोमप्रतिलोमजा
तीनां अंबष्ठक्षत्तृकरणप्रभृतीनां तेषां विजातीयमैथुनसंभवत्वेन खरतुरगीयसंपर्कोज्जाताश्वतरवज्जातत्वं
॥ भगवन्सर्ववर्णानां यथावदनुपूर्वशः। अंतरप्रभवाणां च धर्मान्नो वक्तुमर्हसि·२॥
तरत्वाद्वर्णशब्देनाग्रहणात्पृथक्प्रश्नः। एतेनास्य शास्त्रस्य सर्वोपकारकत्वं दर्शितम्·। यथावत् यो धर्मो यस्य व
र्णस्य येन प्रकारेणार्हतीत्यनेनाश्रमधर्मादीनामपि प्रश्नः। अनुपूर्वशः क्रमेण जातकर्म· तदनु नामधेयमित्यादि
नो धर्मान्नोऽस्मभ्यं वक्तुमर्हसि· सर्वधर्माभिधाने योग्योभवसि· तस्माद्ब्रूहीत्यध्येषणमध्याहार्य्यम्· यत्तु· ब्रह्मह
त्यादिरूपाधर्मकीर्त्तनमप्यत्र तत्प्रायश्चित्तविधिरूपधर्मविषयत्वेन न स्वतंत्रतया·॥२॥ सकलधर्माभिधान
योग्यत्वे हेतुमाह· त्वमेक इत्यादि· हि शब्दो हेतौ· यस्मात्त्वमेकोऽद्वितीयः अस्य सर्वस्य प्रत्य ह्यकृतस्य स्वस्य त्वाद्यनुमे

यस्य च विधानस्याविधीयंतेऽनेन कर्माण्यग्निहोत्रादीनीति विधानं वेदस्तस्य स्वयंभुवोऽपौरुषेयस्याचिंत्य
3 स्य· बहुशाखाविभिन्नत्वादियत्तया परिच्छेत्तुमशक्यस्य· अप्रमेयस्य· मीमांसादिन्यायनिरपेक्षतयाऽनवगम्य
मानप्रमेयस्य कार्यमनुष्ठेयमग्निहोमादि· तत्त्वं ब्रह्म· सत्यं ज्ञानमनंतं ब्रह्मेत्यादि वेदांतवेद्यं· तदेवार्थः। प्रति
पाद्यः प्रतिपादकं भोववभागस्तं वेत्तीति कार्यतत्त्वार्थवित्· मेधातिथिस्तु कर्ममीमांसा वा स न यावद्वेदस्य कार्यमेव
तत्त्वरूपोऽर्थस्तं वेत्तीति कार्यतत्त्वार्थविदिति व्याचष्टे· तन्न· वेदानां ब्रह्मण्यपि प्रामाण्याभ्युपगमान्न कार्यमेव तत्त्व

त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः। अचिंत्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो॥३॥

रूपोऽर्थः। धर्माधर्मव्यवस्थापनसमर्थत्वात्प्रभो इति संबोधनम्॥३॥ सतैः पृष्टस्तथा सम्यगित्यादि· समनु
स्तैर्महर्षिभिस्तथा तेन प्रकारेण पृष्टो तेन न्यायेन प्रणतिप्रश्नपुष्पादिना पृष्टस्तान्सम्यक् यथा तत्त्वं प्र
त्युवाच श्रूयतामित्युपक्रम्य अमितमपरिच्छेद्यमोजः सामर्थ्यं ज्ञानतत्त्वाभिधानादौ यस्य स तथा· अत एव २
सर्वज्ञः सर्वशक्तिस्तया महर्षीणामपि प्रश्नविषयः महात्मभिर्महानुभावैः। आर्च्य पूजयित्वा· आह सर्वस्याचेत
स्यैवं तत्स्वरूपमिदं· धर्मस्याभिधानमपि पृष्टं न पुरः सरमेव कर्तव्यमित्यनेन फलितम्· ननु मनुं प्रणीतत्वेन

स्यशास्त्रस्य सृष्टेः प्रस्तुवाच इति न युक्तं । अहं पृष्टोऽब्रवीमीति युज्यते अन्यप्रणीतत्वे च कथं मानवीयसंहितेति । उ
च्यते । प्रायेणाचार्याणामियं शैली यत्स्वाभिप्रायमपि परोपदेशमिव वर्णयन्ति । अत एवं कर्माण्यपि जैमिनिः फलार्थत्वा
दिति जैमिनेरेव सूत्रं । अत एव तदुपर्यपि बादरायणः संभवादिति बादरायणस्यैव शारीरकसूत्रं । अथवा मनूपदिष्टध
र्मास्तच्छिष्येण भृगुणा तदाज्ञयोपनिबद्धाः । अत एव वक्ष्यति । एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः इत्यतो युज्यत
एव सृष्टेः प्रस्तुवाच इति । मनूपदिष्टधर्मोपनिबद्धत्वाच्च मानवीयसंहितेति व्यपदेशः ॥४॥ श्रूयतामिति उपक्षिप्तम

स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः । प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति ॥४॥

र्थमाह । आसीदिदमिति । ननु मुनीनां धर्मविषयप्रश्ने तत्रैवोत्तरं दातुमुचितं तत्कोऽयमप्रस्तुतः प्रलयदशायां का
रणलीनस्य जगतः सृष्टिप्रकरणावतारः । अत्र मेधातिथिः समाधत्ते शास्त्रस्य महाप्रयोजनत्वमनेन सर्वेण प्रतिपा
द्यते । ब्रह्माद्याः स्थावरपर्यन्ताः संसारगतयो धर्माधर्मनिमित्ता अत्र प्रतिपाद्यन्ते । तमसा बहुरूपेण वेष्टिताः कर्महे
तुनेति वक्ष्यति च । एता दृष्ट्वास्य जीवस्य गतीः स्वेनैव चेतसा । धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मन इति । ततश्च निर
तिशयैश्वर्यहेतुर्धर्मस्तद्विपरीतश्चाधर्मः । तद्रूपपरिज्ञानार्थमिदं शास्त्रं महाप्रयोजनमध्येतव्यमित्याद्याध्याय

तात्पर्यमित्यंतेन॰ गोविंदराजस्याप्येतदेव समाधानम्॰ नैतन्मनोहरं॰ धर्मस्वरूपप्रश्ने यद्धर्मस्य फलकीर्त्तनं तदप्रस्तु
तं॰ धर्मोक्तिमात्राद्धि शास्त्रमर्थवत्॰ किंच कर्मणां फलानि हि तिं शंसे सुक्ते महर्षिभिः। द्वादशैव वर्षमाणाना वक्तुमादे
नयुज्यते॰ इदं तु वदामः। मुनीनां धर्मविषये प्रश्ने जगत्कारणतया ब्रह्म प्रतिपादनं धर्मकथनमेवेति नाप्रस्तुताभिधा
नम्॰ आत्मज्ञानस्यापि धर्मस्वरूपत्वान्मनुनैव धृतिः क्षमा दमोस्तेयं शौचमिंद्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दश
कं धर्मलक्षणमिति॰ दशविधधर्माभिधाने विद्या[illegible]शब्दवाच्यमात्मज्ञानं धर्मत्वेनोक्तं॰ महाभारतेपि॰ आत्मज्ञानं तिति

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्॰ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।५॥ ॥

क्षा च धर्मः साधारणो नृपेत्यात्मज्ञानं धर्मत्वेनोक्तं॰ याज्ञवल्क्येन तु परमधर्मत्वेन॰ यदाह॰ इज्याचारदमाहिंसादानं
स्वाध्यायकर्म च॰ अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति। जगत्कारणत्वं च ब्रह्मलक्षणं अत एव ब्रह्ममीमांसायां।
अथातो ब्रह्मजिज्ञासेति सूत्रानंतरं ब्रह्मलक्षणकथनाय जन्माद्यस्य यत इति द्वितीयसूत्रं भगवान् बादरायणः प्र ४
णिनाय॰ अस्य जगतो यतो जन्मादि सृष्टिस्थितिप्रलयमिति सूत्रार्थः। तथा च श्रुतिः। यतो वा इमानि भूतानि जायंते
येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति। प्राधान्येन जगदुत्पत्तिस्थितिलयनिमित्तोपा

दानब्रह्मप्रतिपादनं · आत्मज्ञानरूपपरमधर्मोपक्रमाय प्रथमाध्यायं कृत्वा संस्कारादिरूपं धर्मं तदंगतया द्वितीया-
ध्यायादिक्रमेण वक्ष्यतीति न कश्चिद्विरोधः । किं च प्रश्नोत्तरवाक्यानामेव स्वरसादयमनुक्तोऽर्थो लभ्यते तथाहि · धर्मे
पृष्टे मनुर्ब्रह्मजगतः कारणं ब्रुवन् · आत्मज्ञानं परं धर्मं विद्धीति व्यक्तमुक्तवान् · प्राधान्यात्प्रथमाध्याये साधुतस्यैव
कीर्त्तनम् · धर्मोऽन्यस्तु तदंगत्वाद्युक्तो वक्तुमनंतरं · इदमित्यध्याहारेण सर्वस्य प्रतिभासमानत्वात् जगन्निर्दिश्यते · इ-
दं जगत्तमोभूतं तमसि स्थितं लीनमासीत्तमःशब्देन गुणवृत्त्या प्रकृतिर्निर्दिश्यते तम इव तमः । यथा तमसि लीनाः
पदार्था अध्यक्षेण न प्रकाश्यंते एवं प्रकृतिलीना अपि भावा नावगम्यंते इति गुणयोगः । प्रलयकाले सूक्ष्मरूपत-
या प्रकृतौ लीनमासीदित्यर्थः । तथा च श्रुतिः । तम आसीत्तमसा गूढमग्र इति । प्रकृतिरपि ब्रह्मात्मना अव्याकृताऽऽ-
सीत् अत एव अप्रज्ञातम् प्रत्यक्षं सकलप्रमाणश्रेष्ठं तया प्रत्यक्षागोचरः अप्रज्ञात इत्युच्यते तन्न भवतीत्यप्रज्ञातं अ-
लक्षणमननुमेयं · लक्ष्यतेऽनेनेति लक्षणं लिंगं तदस्य नास्तीति अलक्षणं · अप्रतर्क्यं तर्कयितुमशक्यं तदानीं वा-
चकस्थूलशब्दाभावात् शब्दतोऽप्यविज्ञेयं एतदेव च प्रमाणत्रयं सतर्कं द्वादशाध्याये मनुनाभ्युपगतं · अत एवावि-
ज्ञेयमित्यर्थापत्त्याद्यगोचरमिति धरणीधरस्यापि व्याख्यानम् · न च नासीदेवेति वाच्यं तदानीं श्रुतिसिद्धत्वात् ·

तथा च श्रूयते· तद्धेदं तर्ह्यव्याकृतमासीत् छांदोग्योपनिषच्च· सदेव सोम्येदमग्र आसीत्· इदं जगत्सदेवासीद्ब्रह्मात्मना आ
5 सीदित्यर्थः। सच्छब्दो ब्रह्मवाचकः। अत एव प्रसुप्तमिव सर्वतः प्रथमार्थे तसिः स्वकार्याक्षममित्यर्थः ॥५॥ अथ किमभूदि
त्याह· ततः स्वयंभूर्भगवानित्यादि· ततः प्रलयावसानानंतरं स्वयंभूः परमात्मा स्वयंभवति स्वेच्छया शरीरपरिग्रहं करो
ति· न त्वितरजीववत्कर्मायत्तदेहः। तथा च श्रुतिः। स एकधा भवति द्विधा भवतीति। भगवानैश्वर्यादिसंपन्नः अव्यक्तो
वाह्यकरणागोचरः योगाभ्यासावसेय इति यावत्· इदं महाभूतादि आकाशादीनि महाभूतानि आदिग्रहणान्महदा
ततः स्वयंभूर्भगवानव्यक्तो व्यंजयन्निदम्· महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥६॥ ॥
दीनि च व्यंजयन्· अव्यक्तावस्थं प्रथमं सूक्ष्मरूपेण ततः स्थूलरूपेण प्रकाशयन्। वृत्तौजाः वृत्तमप्रतिहतमुच्यते
अत एव वृत्तिसर्गेनायनेषु क्रम इत्यत्र वृत्तिरप्रतिघात इति व्याख्यातं जयादित्येन· वृत्तमप्रतिहतमोजः सृष्टिसाम
र्थ्यं यस्य स तथा· तमोनुदः प्रकृतिप्रेरकः· तदुक्तं भगवद्गीतायां। मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति· प्रादु
रासीत्प्रकाशितो बभूव· तमोनुदः प्रलयावस्थाध्वंसक इति तु मेधातिथिगोविंदराजौ ॥६॥ योसाविति ॥ योसावि ५
ति सर्वनामद्वयेन सकललोकवेदपुराणेतिहासादिप्रसिद्धं परमात्मानं निर्दिशति। अतींद्रियग्राह्यः इंद्रियम

तीत्य वर्त्तत इत्यतींद्रियं मनस्तद्ग्राह्य इत्यर्थः। यदाह व्यासः। नैवासौ चक्षुषा ग्राह्यो न च शिष्टैरपींद्रियैः। मनसा तु
प्रसन्नेन गृह्यते सूक्ष्मदर्शिभिः। सूक्ष्मो बहिरिंद्रियागोचरः। अव्यक्तो व्यक्तिरवयवः तद्रहितः। सनातनो नित्यः। स
र्वभूतमयः सर्वभूतात्मा। अत एवाचिंत्यः इयत्तया परिच्छेत्तुमशक्यः। स एव स्वयमुद्बभौ। महदादिकार्यरूपतया प्रा
दुर्बभूव। उद्बभौ भाति। प्रादुर्भावे वर्त्तते धातूनामनेकार्थत्वात्॥७॥ सोभिध्यायेति॥ स परमात्मा नानाविधाः प्रजाः

योऽसावतींद्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः॥ सर्वभूतमयोऽचिंत्यः स एव स्वयमुद्बभौ॥७॥

सिसृक्षुरभिध्याय आपो जायंतामित्यभिध्यानमात्रेण अप एव ससर्ज। अभिध्यानहर्विकां सृष्टिं वदतो मनोः प्रकृ
तेरेवाचेतनायाः स्वतंत्रायाः परिणमत इत्ययं पक्षो न संमतः। किंतु ब्रह्मणैवाव्याकृतशक्त्यात्मना जगत्कारणमिति त्रिदंडि
वेदांतसिद्धांत एवाभिमतः प्रतिभाति। तथा च छांदोग्योपनिषत्। तदैक्षत बहु स्यां प्रजायेयेति। अत एव शारीरसूत्र
कृता व्यासेन सिद्धांतितं ईक्षतेर्नाशब्दमिति। ईक्षतेरीक्षणश्रवणात् न प्रधानं जगत्कारणं अशब्दं न विद्यते शब्दः श्रुति
र्यस्य तदशब्दमिति सूत्रार्थः। स्वाच्छरीरात् अव्याकृतरूपात्। अव्याकृतमेव भगवद्भास्करीयवेदांतदर्शने प्रकृतिस्त
देवचनस्य शरीरं अव्याकृतशब्देन पंचभूतबुद्धींद्रियकर्मेन्द्रियप्राणमनःकर्माविद्यावासना एव सूक्ष्मरूपतया र

शक्त्यात्मना स्थिता अभिधीयंते· अव्याकृतस्य च ब्रह्मणा सह भेदाभेदस्वीकारात् ब्रह्माद्वैतं शक्त्यात्मना च ब्रह्म जगद्रूपतया
परिणमत इत्युभयमप्युपपद्यते· आदौ स्वकार्यभूमि ब्रह्माण्डसृष्टेः प्राक् स्वरूपावस्थिति अव्ययं महदहंकार तन्मात्रक्रमेण बोद्धव्या
6 ।महाभूतादिव्यंजयन्निति इह अभिधानात् अनंतरमपि महदादिसृष्टेर्वक्ष्यमाणत्वात्· तास्वप्सु बीजं शक्तिरूपमारोपितवा
न्॥८॥ ॥तदंडमभवद्धैममिति· तद्बीजं परमेश्वरेच्छया हैममण्डमभवत्· हैममिव हैमं शुद्धिगुणयोगात् न तु हैम

सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः॥ अप एव ससर्जादौ तासु बीजमवासृजत्॥८॥
तदंडमभवद्धैमं सहस्रांशुसमप्रभम्॥ तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥९॥ ॥

मेव तदीयैकदेशकल्पनभूमिनिर्माणस्य वक्ष्यमाणत्वात्· भूमेश्चाहैमत्वस्य प्रत्यक्षत्वादुपचाराश्रयणं।सहस्रांशुरादि
त्यस्तत्तुल्यप्रभम्· तस्मिन्नंडे हिरण्यगर्भो जातवान् येन पूर्वजन्मनि हिरण्यगर्भोहमस्मीति भेदाभेदभावनया परमेश्व
रोपासना कृता तदीयं लिंगशरीरावच्छिन्नं जीवमनुप्रविश्य स्वयं परमात्मैव हिरण्यगर्भरूपतया प्रादुर्भूतः।सर्वलोका
नां पिता महांजनकः सर्वलोकपितामह इति वा तस्य नाम॥९॥ ॥इदानीमागमसिद्धं नारायणशब्दार्थं निर्वचने ६
न उत्क्रमेवार्थं द्रढयति आपो नारा इत्यादि· आपो नाराशब्देनोच्यन्ते· अमुना राशब्दस्य प्रसिद्धिस्तदर्थमाह· यत

म

स्यानराख्यस्यपरमात्मनः सूनवोऽपत्यानि॰ तस्येदमित्यण् प्रत्ययः। (यद्यपि अणि कृते ङी) प्रत्ययः प्राप्तस्तथापि छांदर
सलक्षणैरपिस्मृतिपुव्यवहारास्सर्वे विधयश्छंदसि विकल्प्यंत इति पाणिनिको ङीप्प्रत्ययस्तस्याभावपक्षेसामान्यलक्षण
प्राप्तेणापि कृते नारा इति रूपसिद्धिः। आपोऽस्यपरमात्मनो ब्रह्मरूपेणावस्थितस्य पूर्वमयनमाश्रय इत्यसौ नारायण इत्या
7 गमेष्वाम्नातः। गोविंदराजेन तु आपो नरा इति पठितं व्याख्यातं च॰ नरायण इति प्राप्ते अन्येषामपि दृश्यत इति दीर्घत्वेन ना
रायण इति रूपं॰ अन्येत्वापो नारा इति पठंति ।१०॥ ॥यत्तत्कारणमव्यक्तमित्यादि॰ यत्तदिति सर्वनामभ्यां लोकवेदादि

आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥१०॥ यत्तत्कारणम
व्यक्तं नित्यं सदसदात्मकम्॰ तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते॰ ॥११॥ ॥ ॥ ॥

सर्वप्रसिद्धं परमात्मानं निर्दिशति॰ कारणं सर्वोत्पत्तिमतां अव्यक्तं बहिरिंद्रियागोचरं नित्यं उत्पत्तिविनाशरहितं॰ वेदांत
सिद्धत्वात् सत्स्वभावं प्रत्यक्षाद्यगोचरत्वात्॰ असत्स्वभावमिव॰ अथवा सज्जातमसद्भावः तयोरात्मभूतं॰ तथा चश्रु
तिः। ऐतदात्म्यमिदं सर्वमिति॰ तद्विसृष्टः तेनोत्पादितः स पुरुषः सर्वत्र ब्रह्मेति कीर्त्यते ॥११॥ ॥तस्मिन्नंडे स भगवा
नित्यादि॰ तस्मिन् पूर्वोक्तेऽण्डे स ब्रह्मा वक्ष्यमाणब्रह्ममानेन संवत्सरमुषित्वा स्थित्वा आत्मनैवांडं द्विधाभवत्विति आत्म
गतध्यानमात्रेण तदंडं द्विखंडं कृतवान्॰ ॥१२॥ ॥ताभ्यां स शकलाभ्यामित्यादि। शकलं खंडं ताभ्यामंडशकलाभ्यां